**इयम् आकाशवाणी**

**सम्प्रति वार्ता: श्रूयन्ताम्**

**दिनाङ्क :- 13.09.2024 सायम् - 06:20**

**आदौ-मुख्यवार्ता:**

- सर्वोच्चन्यायालयेन अद्य दिल्ली-राज्यस्य मुख्यमन्त्रिणे आम आदमी-पार्टीति दलस्य राष्ट्रिय-संयोजकाय अरविन्द केजरीवालाय केन्द्रीय-अन्वेषण-विभाग द्वारा अभिलिखितायां कथितोत्पाद-नीति-अनियमिततायां पञ्जीकृते भ्रष्टाचार-प्रकरणे प्रतिभूतिः प्रदत्ता।
- प्रशासनेन अण्डमान-निकोबार-द्वीप समूहस्थस्य **पोर्ट ब्लेयर** इत्यस्य नामान्तरणं कृत्वा श्रीविजयपुरम् इति स्थापनस्य निर्णयो गृहीता:।
- हरियाणायाम् एकस्मिन्नेव चरणे सम्पाद्यमानोभ्य: निर्वाचनेभ्य: जम्मू-कश्मीरे च तृतीयचरणीयमतदानेभ्य: नामाङ्कनपत्राणां निरीक्षणकार्यं सम्पन्नम्।
- भारतीय-खाद्य-सुरक्षा-गुणवत्ता-अभिकरणेन सर्वेऽपि प्रदेशा:, केन्द्रशासितप्रदेशाश्च निर्दिष्टा: सन्ति यत् व्रतोत्सवीय कालेऽस्मिन् खाद्यपदार्थेषु कथमपि अनुचितमिश्रणादिकं न भवेदिति।
- अमेरिकाया: राष्ट्रपति: जो-बाइडेन: अस्य मासस्य एकविंशे दिनाङ्के क्वाड नेतृणां शिखरसम्मेलनस्य आतिथ्यं विदधास्यति।

**सर्वोच्चन्यायालय-केजरीवाल**

सर्वोच्चन्यायालयेन अद्य दिल्ली-राज्यस्य मुख्यमन्त्रिणे आम आदमी-पार्टीति दलस्य राष्ट्रिय-संयोजकाय अरविन्द-केजरीवालाय केन्द्रीय-अन्वेषण-विभाग द्वारा अभिलिखितायां कथितोत्पाद-नीति-अनियमिततायां पञ्जीकृते भ्रष्टाचार-प्रकरणे प्रतिभूतिः प्रदत्ता। मुख्यमन्त्रिणे केजरीवाल इत्यस्मै दशलक्षरूप्यकाणां प्रतिभू-बन्धपत्रस्य आधारेण आश्वस्तिः प्रदत्ता। सर्वोच्चन्यायालयेन तस्य प्रतिभू-मुक्तेः विषये अपि समया: स्थापिता:, येन आपेतिदल-नेता प्रकरणस्य योग्यतायाः विषये वा किमपि सार्वजनिकं भाषणं कर्तुम् नार्हति, तथा च यावत् मुक्तः न भवति तावत् सः निम्नन्यायालयस्य पुरतः उपस्थितः भवेदिति। न्यायाधीशः सूर्यकान्त: अथ न्यायाधीशः उज्जल भुइयां इत्येतयोः द्विसदस्यीयपीठेन, दिल्ली-राज्यस्य मुख्यमन्त्रिणे निर्णयोऽयं प्रदत्त:। श्रीकेजरीवाल: अस्य वर्षस्य मार्च्-मासस्य एकविंशे दिनाङ्के प्रवर्तन-निर्देशालयेन उत्पादशुल्क-नीत्या सम्बद्धे धनशोधन-प्रकरणे निगडितः आसीत्।

**भाजपा-आप-केजरीवाल:**

भारतीय-जनता-पार्टीति दलेन अद्य उक्तं यत् सर्वोच्चन्यायालयेन दिल्ल्या: मुख्यमन्त्रिणे अरविन्दकेजरीवालाय दर्पणं दर्शितम्। यतो हि मद्यनीतिप्रकरणे तस्मै ससमयं प्रतिभूति: प्रदत्ताऽस्ति। नवदिल्यां वार्ताहरै: सह भाषमाण: भाजपेति दलप्रवक्ता गौरवभाटिया: उक्तवान् यत् श्रीकेजरीवालस्य पक्षमासीत् यत् तस्य निगडनं विधिसम्मतं नास्तीति, परं सर्वोच्च- न्यायालयेन तस्य पक्षम् निरसितमिति। तेनोक्तं यत् श्रीकेजरीवालाय न कदापि न हि केनापि न्यायालयेन आश्वस्ति: दत्ता, न हि आरोपाश्च निरसिता:। अपरत्र आपेति दलस्य वरिष्ठनेत्रा मनीष सिसोदिया इत्यनेन उक्तं यत् प्रतिभूति: सिद्धयति यत् केन्द्रीयान्वेषणाभिकरणस्य प्रकरणम् प्रवर्तननिदेशालयस्य प्रकरणात् मोचनावरोधाय एव आसीदिति।

**पोर्ट-ब्लेयर**

प्रशासनेन अण्डमान-निकोबार-द्वीप समूहस्थस्य पोर्ट ब्लेयर इत्यस्य नामान्तरणं कृत्वा श्रीविजयपुरम् इति स्थापनस्य निर्णयो गृहीतोऽस्ति। एतस्य घोषणा केन्द्रीय गृहमन्त्रिणा श्रीअमितशाहेन सामाजिकप्रसारतन्त्रजालीयसन्देशे कृता।

**हरियाणा-जम्मू-कश्मीर**

हरियाणायाम् एकस्मिन्नेव चरणे सम्पाद्यमानोभ्य: निर्वाचनेभ्य: जम्मू-कश्मीरे च तृतीयचरणीयमतदानेभ्य: नामाङ्कनपत्राणां निरीक्षणकार्यं ह्य: सम्पन्नम्। हरियाणायां नामाङ्कनप्रत्यावर्तनम् अस्य मासस्य षोडशदिनांङ्कं यावत् कर्तुं शक्यते, जम्मू-कश्मीरे च सप्तदशदिनांकं यावत् प्रत्याशिन: नामाङ्नप्रत्यावर्तन-कर्तुं शक्ष्यन्तीति निर्वाचनायोगस्य अस्ति घोषणा।

**एफ एस एस ए आई**

भारतीय-खाद्य-सुरक्षा-गुणवत्ता-अभिकरणेन सर्वेऽपि प्रदेशा:, केन्द्रशासितप्रदेशाश्च निर्दिष्टा: सन्ति यत् व्रतोत्सवीय कालेऽस्मिन् खाद्यपदार्थेषु कथमपि अनुचितमिश्रणादिकं न भवेदिति। सहैव हि नियमिततया द्रुतक्रमेण च निरीक्षणादिकं कार्यं भवेदिति दिङ्निर्देशा: अभिकरणेन सन्ति निस्सारिता:।

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रम: आकाशवाण्या: अन्तर्जालपटले** www.newsonair.gov.in **इत्यत्र, अथ** newsonair **चलदूरभाषीय-तन्त्रांशे**

**नोएडा सेमीकॉन**

ग्रेटर्-नोएडा-नगरस्य इण्डिया-एक्सपो-सेण्टर्-एण्ड्-मार्ट् इत्यत्र आयोजिते सेमिकान्-इण्डिया-2024 इत्यस्य अद्य अन्तिमः दिवसः अस्ति। त्रिदिवसीयः कार्यक्रमः बुधवासरे प्रधानमन्त्रिणा नरेन्द्रमोदिना उद्घाटित:। आकाशवाणी-वार्तया सह वार्तालापं कुर्वन्, सेमी इत्यस्य महानिदेशक: अजित मनोचा अवदत् यत् सेमिकान्-इण्डिया-2024, कस्यापि देशे आयोजितेषु सर्वाधिकं सफलेषु बृहत्तमेषु सेमिकान्-नगरेषु अन्यतमम् अस्ति इति। सः अवदत् यत्, सेमिकण्डक्टर् पारीस्थितिकीतन्त्र इत्यस्य शताधिकाः महानिदेशका:अत्र भागं गृहीतवन्त:।

कोह्-यङ्ग्-टेक्नालजी-सिङ्गापुर् इत्यस्य थामस्-लाउ इत्येषः अवदत् यत् सेमिकान्-इण्डिया इति कार्यक्रमः तेषां कृते लाभप्रदः अस्ति यतोहि अत्र भूरिश: उपस्थित्या सह अनेके सहयोगाः च अभवन्। ए. सी. ई. एस्. इत्यस्य विक्रान्तगुप्तः अवदत् यत् पूर्वं सेमिकण्डक्टर् इत्यस्य उत्पादनं केवलं केषुचित् देशेषु एव सीमितम् आसीत्, उद्योग-विशेषाः च तेषु आश्रिताः आसन्। परन्तु अधुना सेमिकान्-इण्डिया इत्यादिभिः कार्यक्रमै: नूतनपारिस्थितिकतन्त्रस्य विकासः भवन्नस्ति येन अस्मै क्षेत्राय लाभप्रदं भविष्यति।

**शाह-राजभाषा-सम्मेलनम्**

केन्द्रीयगृहमन्त्री अमितशाह: श्व: नवदिल्यां राजभाषा-हीरक-जयन्ती-समारोहेण सह चतुर्थ अखिलभारतीय-राजभाषा-सम्मेलनस्य उद्घाटनसत्रमपि सम्बोधयिष्यति। राजभाषाविभाग: हिन्दीभाषाया: राजभाषात्वेन पञ्चसप्ततिवर्षाणां पूर्ताविधौ आयोजनमिदम् समायोजयति। श्व: हिन्दी-दिवसावसरे श्रीशाह: राजभाषा-भारती इत्याख्याया: पत्रिकाया: विशिष्टं हीररकजयन्त्यंकमपि लोकार्पयिष्यति। सहैव हि श्रीशाह: राजभाषागौरव अथ राजभाषाकीर्ति इत्येतौ पुरस्कारौ अपि प्रदास्यति।

**राष्ट्रियान्वेषणाभिकरण(एन आई ए)**

एन आई ए इति राष्ट्रियान्वेषणाभिकरणेन अद्य अनेकेषु स्थलेषु अन्वेषणाभियानं प्रचालितम्। भारतीय-उच्चायोगस्योपरि आक्रमणमभिलक्ष्य कृतान्वेषणे पञ्जाबप्रान्तस्य नैकेषु स्थलेषु आकस्मिकान्वेषणकार्यं कृतम्। कनाडायां खालिस्तानसमर्थकै: आक्षेपितान् आरोपाननुसारम् आयोगेन अन्वेषणकार्यं कृतम्। अन्वेषणकार्याणि मुख्यत: मोगा-गुरदासपुर-अमृतसर-जालन्धर-जनपदेषु विहितानि। अभिकरणानेन गतवर्षं ओटावाया: भारतीयदूतावासात् बहि: खालिस्तानिभि: कृतविरोधं विरूधं प्रकरणमिदं पञ्जीकृतमासीत्।

**डी आर डी ओ मिसाइल**

रक्षामन्त्रिणा राजनाथसिंहेन ह्य: वी. एल. एस. आर. एस. ए. इत्यस्य सफलपरीक्षणाय रक्षाशोधविकाससंघस्य, भारतीय नौसेनाया: अन्येषाञ्च हितधारकाणां प्रशंसा कृता।

**भारतीय ऋतुविज्ञान विभाग:**

भारतीय-ऋतुविज्ञान-विभागेन आगामिषु कतिपयेषु दिनेषु उत्तराखण्ड्, उत्तरप्रदेश्, दिल्ली, मध्यप्रदेश्, राजस्थान् इत्येतेषु प्रदेशेषु प्रचण्डवृष्टिः भविष्यति इति पूर्वसूचना दत्ता अस्ति। मध्यभारतस्य उपरि विकसितस्य अवसादस्य परिणामतया वृष्टिः अपेक्षिता अस्ति। उत्तराखण्ड्-राज्ये ऋतुविज्ञानविभागेन सप्तमण्डलेषु प्रचण्डवृट्यै रेड्-अलर्ट् इति रक्तिमा संचेतना राज्यस्य शेषभागेषु काषायी सञ्चेतना च प्रकाशितास्ति। पौडी, देहरादून्, बागेश्वर, चम्पावत्, नैनिताल्, उधम् सिङ्घ् नगर्, हरिद्वार् इत्येतेषु मण्डलेषु प्रचण्डवृष्टिः भवितुम् अर्हति। विपद्-व्यवस्थापन-विभागाय सम्बद्धानि सर्वाणि अभिकरणानि सज्जतां निश्चेतुं, आवश्यक-व्यवस्थां च पूरयितुं निर्देशो दत्तः अस्ति।

उत्तरप्रदेशे, विशेषतया पश्चिम-समतलक्षेत्रेषु ऋतुविज्ञानविभागेन निर्गमितायाः सञ्चेतनाया: परिप्रेक्ष्ये, अधिकारिणः जागरूका: सन्ति। अग्रिमाषु चतुर्विंशति होरासु राज्ये प्रचण्डवृष्टिः भविष्यति इति कारणात् उत्तरप्रदेशस्य अनेकेषु भागेषु रक्तवर्णीयाः नारङ्गवर्णीयाः च सञ्चेतना: प्रदत्ताः सन्ति।

**जो बाइडेन**

अमेरिकाया: राष्ट्रपति: जो-बाइडेन: अस्य मासस्य एकविंशे दिनाङ्के क्वाड नेतृणां शिखरसम्मेलनस्य आतिथ्यं विदधास्यति। श्रीनरेन्द्रमोदिना सह अन्येऽपि नेतार: तत्र आहूता: भविष्यन्तीति व्हाइट हाउस इत्यस्य वार्तासचिवेन केरिन-जीन-पिरे इत्यनया उक्तम्।

**।। इति वार्ता:।।**